647510 MA04SanE501B Seat No :________

# M.A. (SANSKRIT) Semester - 4 (*CBCS*) Examination
# April/May-2022 (NEW COURSE)
# Bramhasutra Shreebhashy(Elective-5)

**Time: 2:30 Hours** **Marks: 70**

**Instructions:**

1. All questions are compulsory.
2. Figures to the right indicate marks.

---

प्रश्न.१ કોઈ પણ બે પરિચ્છેદોનો અનુવાદ જરૂરી નોંધ સાથે કરો. (१४)

Translate any two paragraphs with the required notes.

१. जन्मादीति,सृष्टिस्थितिप्रलयम्तद्गुणसंविज्ञानो बहुव्रीहिः। अस्याचिन्त्यविविध विचित्ररचनस्य नियतदेशकालफलभोग-ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगत:।यत:- यस्मात्सर्वेशवरान्निखिलहेयप्रत्यनीकस्वरूपात्त् सत्यसंकल्पात् ज्ञानानन्दाद्यनन्तकल्याण-गुणात् सर्वज्ञात् सर्वशक्ते: परमकारुणिकात् परस्मात् पुंस: सृष्टिस्थितिप्रलया: वर्तन्ते, तत् ब्रह्मेति सूत्रार्थ:।

२. शास्त्रं योनि: कारणं प्रमाणम्,तच्छास्त्रयोनि:,तस्य भावः शास्त्रयोनित्वम्। तस्मात् ब्रह्मज्ञान-कारणत्वात्शास्त्रस्य,तदयोनित्वं ब्रह्मण:। अत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया ब्रह्मण: शास्त्रैकप्रमाणकत्वात् उक्त स्वरूपं ब्रह्म – "यतो वा इमानि भूतानि जायन्ते" इत्यादि वाक्य बोधयत्येवेत्यर्थ: ।

३. ननु "देवदत्त: श्यामो युवा लोहिताक्ष: समपरिणाम:" इत्यत्र विशेषणबहुत्वेऽप्येक एव देवदत्त: प्रतीयते । एवमत्राप्येकमेव ब्रह्म भवति । नैवम्- तत्र प्रमाणान्तरेण ऐक्यप्रतीते: एकस्मिन्नेव विशेषणानामुपसंहारः । अन्यथा तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यम् ।

४. "यतो वा इमानि भूतानि जायन्ते" इत्यादि कारणवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मण: सकलेतरव्यावृत्तम् स्वरूपमभिधीयते । "सत्यं ज्ञानमनन्तं ब्रह्म" इति । तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह । तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्त: ।

प्रश्न.२ કોઈ પણ બે પરિચ્છેદોનો અનુવાદ જરૂરી નોંધ સાથે કરો. (१४)

Translate any two paragraphs with the required notes.

१. रज्जुरेषा न सर्प:,इत्युपदेशेन सर्पभयनिवृत्तिदर्शनात् रज्जुसर्पवत् बन्धस्य च मिथ्यारूपत्वेनज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता,न नियोगेन। नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात् स्वर्गादिवत् । मोक्षस्य नित्यत्वं हि सर्ववादि संप्रतिपन्नम् ।

२. एवं भूतं ब्रह्म कथं प्राप्यत इत्यपेक्षयां "ब्रह्मविदाप्नोति परम्" आत्मानमेव लोकमुपासीत्" इति वेदनादिशब्दैरूपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा "स्ववेश्मनिधिरस्ति" इति वाक्येन निधिसद्भावं ज्ञात्वा तृप्त: सन् पश्चादुपादाने च प्रवर्तते ।

३. तत्र ब्रह्म ध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृत-विविधभेदाद्वितीयज्ञानैकरसब्रह्मरूप-मोक्ष: प्राप्यते । न च वाक्यात् वाकयार्थज्ञानमात्रेण ब्रह्मभावसिद्धि: । तथा च सति श्रवणादिविधानमनर्थकं स्यात् ।

४. यतो वाक्यादपरोक्षस्य ज्ञानासंभवात् वाक्यार्थज्ञानेनाविद्या न निवर्तते,तत एव जीवन्मुक्तिरपि दूरोत्सारिता । का चेयं जीवन्मुक्ति: ? सशरीर एव मोक्ष इति चेत्-"माता मे वन्ध्या" इति वदसंगतार्थं वचः यत: अशरीरत्वमेव सशरीरत्वमेव बन्ध: मोक्ष इति त्वयैव श्रुतिभिरुपपादितम् ।

प्रश्न.३ "जन्माद्यस्य यत:" सूत्रमिदं श्रीभाष्यानुसारं स्पष्टयतु । (१४)

Expalin the sutra "जन्माद्यस्य यत:" According to Shri-Bhashya

अथवा

प्रश्न.३ "शास्त्रयोनित्वात्" सूत्रमिदं श्रीभाष्यानुसारं स्पष्टयतु ।

Expalin the sutra "शास्त्रयोनित्वात्" According to Shri-Bhashya

प्रश्न.४ श्रीभाष्यानुसारं " जीवन्मुक्ति-सिद्धान्तं" खण्डयतु । (१४)

Counter the " जीवन्मुक्ति-सिद्धान्त" According to Shri-Bhasya

अथवा

प्रश्न.४ "तत्तु समन्वयात्" सूत्रमिदं श्रीभाष्यानुसारं स्पष्टयतु

Expalin the sutra "तत्तु समन्वयात्" According to Shri-Bhashya

प्रश्न.५ કોઈ પણ બે પર ટૂંક નોંધ લખો. (१४)

Write short note any two.

१. सत्यं ज्ञानमनन्तं ब्रह्म
२. मोक्ष-स्वरूपम्
३. निर्विशेष-ब्रह्मवादस्य खण्डनम्
४. नियोग-विधि:

****************************